श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्रीमद्विट्ठलेशाचार्य विरचितं

# ॥ श्रीमद्गोकुलाष्टकम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Sri. Sundar Varadarajan of Chennai for proofreading this text.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्रीमद्गोकुलाष्टकम् ॥

श्रीमद्गोकुलसर्वस्वं श्रीमद्गोकुलमण्डनम्।
श्रीमद्गोकुलदृक्तारः श्रीमद्गोकुल जीवनम्॥ १ ॥

श्रीमद्गोकुलमित्रेशः श्रीमद्गोकुलपालकः।
श्रीमद्गोकुललीलाब्धिः श्रीमद्गोकुलसंश्रयः॥ २ ॥

श्रीमद्गोकुलजीवात्मा श्रीमद्गोकुलमानसः।
श्रीमद्गोकुलदुःखघ्नः श्रीमद्गोकुलवीक्षितः॥ ३ ॥

श्रीमद्गोकुलसौन्दर्यः श्रीमद्गोकुलसत्फलम्।
श्रीमद्गोकुलगोप्राणः श्रीमद्गोकुलकामदः॥ ४ ॥

श्रीमद्गोकुलराकेशः श्रीमद्गोकुलतारकः।
श्रीमद्गोकुलपद्माळिः श्रीमद्गोकुलसंस्तुतः॥ ५ ॥

श्रीमद्गोकुलसङ्गीतः श्रीमद्गोकुललास्यकृत्।
श्रीमद्गोकुलभावात्मा श्रीमद्गोकुलपोषकः॥ ६ ॥

श्रीमद्गोकुलहृत्स्थानः श्रीमद्गोकुलसंवृतः।
श्रीमद्गोकुलदृक्पुष्पः श्रीमद्गोकुलमोदितः॥ ७ ॥

श्रीमद्गोकुलगोपीशः श्रीमद्गोकुलललितः।
श्रीमद्गोकुलभोग्यश्रीः श्रीमद्गोकुलसर्वकृत्॥ ८ ॥

इमानि गोकुलेशस्य नामानि वदने मम।
वसन्तु सन्ततं चैव लीला च हृदये सदा॥ ९ ॥

॥ इति श्रीमद्गोकुलाष्टकं सम्पूर्णम् ॥

www.prapatti.com